# Dakshakritam Rudra Stotram

# दक्षकृतं रुद्रस्तोत्रम्

## Document Information

Text title : Dakshakritam Rudra Stotram

File name : dakShakRRitaMrudrastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | satIkhaNDa | adhyAya 42/32-41||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 19, 2024

*sanskritdocuments.org*

# दक्षकृतं रुद्रस्तोत्रम्

दक्ष उवाच ।
नमामि देवं वरदं वरेण्यं महेश्वरं ज्ञाननिधिं सनातनम् ।
नमामि देवाधिपतीश्वरं हरं सदासुखाढ्यं जगदेकबान्धवम् ॥ ३२॥

नमामि विश्वेश्वरविश्वरूपं पुरातनं ब्रह्मनिजात्मरूपम् ।
नमामि शर्वं भवभावभावं परात्परं शङ्करमानतोऽस्मि ॥ ३३॥

देवदेव महादेव कृपां कुरु नमोऽस्तु ते ।
अपराधं क्षमस्वाद्य मम शम्भो कृपानिधे ॥ ३४॥

अनुग्रहः कृतस्ते हि दण्डव्याजेन शङ्कर ।
खलोऽहं मूढधीर्देव ज्ञातं तत्त्वं मया न ते ॥ ३५॥

अद्य ज्ञातं मया तत्त्वं सर्वोपरि भवान्मतः ।
विष्णुब्रह्मादिभिस्सेव्यो वेदवेद्यो महेश्वरः ॥ ३६॥

साधूनां कल्पवृक्षस्त्वं दुष्टानां दण्डधृक्सदा ।
स्वतन्त्रः परमात्मा हि भक्ताभीष्टवरप्रदः ॥ ३७॥

विद्यातपोव्रतधरानसृजः प्रथमं द्विजान् ।
आत्मतत्त्वं समावेत्तुं मुखतः परमेश्वरः ॥ ३८॥

सर्वापद्भ्यः पालयिता गोपतिस्तु पशूनिव ।
गृहीतदण्डो दुष्टांस्तान् मर्यादापरिपालकः ॥ ३९॥

मया दुरुक्तविशिखैः प्रविद्धः परमेश्वरः ।
अमराननतिदीनाशान् मदनुग्रहकारकः ॥ २.४२.४०॥

स भवान् भगवान् शम्भो दीनबन्धो परात्परः ।
स्वकृतेन महार्हेण सन्तुष्टो भक्तवत्सल ॥ ४१॥

इति शिवपुराणे रुद्रसंहितायां सतीखण्डे द्विचत्वारिंशाध्यायान्तर्गतं

दक्षकृतं रुद्रस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । सतीखण्ड । अध्याय ४२/३२-४१ ॥

shivapurANa . rudrasaMhitA . satIkhaNDa . adhyAya 42/32-41..

Proofread by PSA Easwaran

*Dakshakritam Rudra Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*